Shri Raghunatha Temple MSS. Library,
JAMMU
६२११-१

No. १०० ग-१ E-34

Title पंचपादिकाविवरणम् (दशमवर्णकम्)

Author प्रकाशात्मभगवान्

Extent १८ पत्र Age ह. १८६३

Subject वेदान्त

(c) Dharmarth Trust. Digitized By eGangotri

नं. १८८

अथ षंचक दिक्कु विवरण स्य समन्वय तत्त्वस्याष्टमवर्गीकर

नं. १८७४

(c) Dharmarth Trust. Digitized By eGangotri

वि॰ ८ ॐश्रीगणेशायनमः नन्वस्तु त्वयात् ज्ञानानंदैकरूपंनिखिल
१ जगदुपादानमीशंप्रमाणासर्वज्ञंब्रह्मनित्यंविशदमतितरां
निर्गुणंतानिःक्रियंच एतत्कार्यंविमुक्तिर्निखिलभववतीसम्य
ग्ज्ञानविद्यात्वप्रामाण्यंस्फुरतीनांस्फुरतिभिरिदमजस्रेयमिन्तु
च्यतेस्मिन् जगतोजन्मा[illegible]रणाज्ञानानंदब्रह्मेतिचल
तितंतत्त्ववेदांताःप्रमा[illegible]णानिप्रमितिज्ञानेनब्रह्मदतिरूपणी
यंकिंभूतेष्वर्थवेदःप्रमाणत्वेनवेत्तिनेतितावदाहकथ्यपुन
त्वा= र्भ्रमिराइति नत्वैदेपःकिंनिबंधनःस्तत्वप्रमाणाद्यादित्वा
हयावत्ताम्नायस्येति ननुवेदाम्नायमान एवमस्तुच्यतेकिं
वाक्रियापरत्वामितिनतावत्क्रियापरत्वस्यादिमध्याव
सानेषुनास्पर्येणग्रहैकपर्यवसानादितिनचाहुपयापि
प्रदर्शितनतीतिनप्यापितत्त्वनसंभवतिप्रामाण्यमित्यर्थः
ननुशब्दस्यशक्तिनामर्थेविद्यतेनत्वशब्दःप्रमाणानविव

(c) Dharmarth Trust. Digitized By eGangotri

यविशेषापेक्षं शाब्दस्य प्रामाण्यं विषयस्य शाब्दप्रमिति
हेतुत्वाभावादिति तन्न ग्राह्यपरिच्छित्तिमेव कुर्वन्ति [illegible]
त्तिमविषयनित्यवगम्यमानैव तत्तत्साध्यस्वभावे वा
वस्तुनीत्यर्थः ननु परिच्छित्तिर्नापि रसेन चक्षुषा
घ्राणेन नापि जिह्वया गन्धः नत्र परिच्छित्तिर्न घ्राणाद्यप्रमा
णान्तरानधिगम्यतया सहैवो [illegible] रसस्यानृतं न च
हेतुवादीनामिति रसन [illegible] विषयव्यभिचारवदागमव्याप्तिरि
क्तप्रमाणानां परिच्छि [illegible] ष्वतिव्यभिचारादर्शनात्
भूतं चैतत्प्रमाणान्तरगम्य [illegible] विशीयते ननु प्रत्यक्षा
दीनामपि वस्तुनि प्रमाणान्तरगम्यत्वैयाथ्यं भिचाराभावात्
कार्यमपि प्रमाणान्तराधिगम्यं किं न स्यात् तत्साध्यस्वभा
५० वत्वात् प्रत्यक्षाद्यनधिगम्यतया सर्वं घाणुहरणान्नु [illegible] ५
७·८ मानादिनानवगम्यत्वात् नुष्टव्यापद्धे प्रमाणान्तरयो

(c) Dharmarth Trust. Digitized By eGangotri

वि० ८ ग्यमितिच ग्र[illegible]गाद्वं स्मृतं वस्तुप्रमाणान्तरयोग्यमिति ।
२० ग्रहणं प्रयोजकस्यानिरूपाधिकत्वलाभात् ननु रूपाधि दि
हीनत्वाद्भ्रमापि प्रमाणान्तरानधिगम्यमेव तस्यापि परि
निश्चितवस्तुत्वात् प्रमाणान्तरयोग्यत्वाशंकानतिवर्तते
अस्तिच प्रमाणान्तरं प्र[illegible]वितानमवस्तत्संवादाद
प्रमाणं वेदान्ताः नन्[illegible]वासि प्रमाणान्तरसापेक्षत्वा
तेनतत्संवादविसंवादाभ्यां प्रामाण्यमप्रामाण्यं वास्तु वेद
देष्वच तात्कुरुषसंबंधाभावात् [illegible]न्ते सतनधिगत
वि[illegible]यत्वाचत्वादिदोषानपेक्षमेव प्रामाण्यमिति चेदुच्य
ते नन्वपौरुषेयत्वादिति परिहरन्ति सत्यं तस्यापीति अयमर्थः
अनपेक्षप्रमाणयोरपि चक्षुस्पर्शयोरर्थविसंवाददर्शनात् तस्या
प्रामाण्यवत्त्वतस्त्वलैकत्वाक्रान्तेरहं मनुष्य इति प्रत्यक्षस्य च प
रस्परव्याघातान्न शब्दस्याप्रामाण्यमिति किं चात्रः स्वलुलो

(c) Dharmarth Trust. Digitized By eGangotri

केप्रामाण्यंनतैरेवार्थमवगम्य परस्मै शब्दं प्रयुंजानः श्रोतुः स्वा

ध्यायपरंपरया वा प्रयोजनपर्यंतमर्थं विवक्षितया प्रयुंक्ते प्रयो

जनानभिसंधानेनान्यपर्यादर्शनात् नत्वप्रयोजनं साध्यत्व

भावमिति परिनिष्ठितं वस्तुस्वरूपं न प्रयोजनं नापि क्रिया

मनपेक्ष्य प्रयोजनसाधनमिति न [illegible] हि नः प्राहुः

प्रामाण्यमस्मज्जनस्त्याह [illegible] त्वादित्यादि

ना न तेन न काचिदनुपसंहारात् किं च विधायकपदव्यतिरि

क्तानां पदानां संभूय प्रमाण [illegible] नाधिगतवस्तुप्रतिपाद

नं न संभवति प्रमाणान्तरानधिगतविषये संबंधाग्रहणा

त्पयस्यासंबंधग्रहणामर्थप्रतिपादनं [illegible] कार्यस्य तु प्रमा

णांतरानवसेयत्वपक्षे [illegible] पदार्थानामनज्ञावस्त्वाद्युक्ता

शब्देभ्योऽपूर्वार्थप्रमितिरिति दर्शयति किं च प्रत्यक्षाद्यविषा

यत्वादिना कस्मात् [illegible] कार्यव्यवच्छिन्नं भूतवस्तुप्रतिपादना

४

७.८

(c) Dharmarth Trust. Digitized By eGangotri

वि॰ ८ योगात्प्रयोजनशून्यत्वादनधिगतार्थताभावाच्च न प्रमाणं वेदां
३ ताः स्मारणात्तस्मादनर्थका वेदांता इत्युपसंहरति तस्मादि
ति यत्तु न भाष्यकारेणोक्तमादेरयमर्थः मन्त्रार्थवादवेदांताः क
स्यचित्कर्मविशेषस्य प्रकरणे समाम्नाताः येन सोरोदी
दित्यादिवद्विधिसमवायः स्यात् ननु सर्वकर्मविधायिवेदै
कदेशत्वात्सर्वकर्मप्रकरणे स्यात् न सर्वेषां वेदवाक्यै
कवाक्यत्वेन प्रतिपादनाभावादेकवाक्यतायोगात् धर्म
सामान्यस्य प्रतिपाद्यत्वात् [illegible] ग्रामपी वाक्यव
त्वकर्तृकारणसर्वज्ञत्वाद्यर्थानां [illegible] नैव युक्तं
स्तुतिप्रतिपादनयोरुपकाराभावाद्वैपरीत्याच्च नाहि क
र्मणां कर्तॄणामनित्यशुद्धबुद्धमुक्तस्वभावो निर्गुणो निष्क्रि
योऽन्यः [illegible] ब्रह्माभिवाक्यानि स्तवः प्रतिपादनं वा कर्मसु
प्रवृत्तावुपकरोति विपरीतं च स्यात् तस्मान्न कर्मसु वेदा

(c) Dharmarth Trust. Digitized By eGangotri

तानामन्वयः किंनु स्वप्रकरणागतस्य गुणोपासनास्य
संबंध इति भाष्यार्थमनूद्यादिपक्ष[illegible]मितिमदापि विः
शिष्टब्रह्मस्वरूपासिद्धिरित्यर्थः मारवक्षुपासनाशेषत्वा
ब्रह्मस्वरूपसिद्धिर्भाष्याभिप्रेता किंनूपास्यगुणापदेपत्वारे
णावेदांतानांसमन्वयोविवदितिप्राप्ते[illegible]सिद्धतिसम्यक्
मानत्वइति ननुवेदांतवाक्यानांगुणोपदेशत्वेनप्रकरणा
दपिव्युत्थितानांस्वरूपमात्रपर्यवसितानांनोपासनास
बंधोनापिस्वात्मन्युपासनाकल्पयितुंशक्यते ऽफलत्वादिति
तत्राहैवंचाध्ययनविधेर्नि [illegible] श्चेष्टत्वब्रह्मसर्वतत्वार्दन्वा
दिमानत्वतात्पर्यविरोधोत्यपमर्षः तात्पर्य[illegible]मनदर्थप्रमिति
शेषत्वताशाब्दधर्मस्थं विकल्पनातात्पर्यमितिचेदर्थप्रमिति
विवक्षितत्वातादर्थ्येनप्रयुज्यमानत्वंशाब्दधर्म एवतत्राऽपि
तात्पर्यंनविविदामात्रं नेवतात्पर्यंयस्मिन्नर्थेवाक्यस्यषक

(c) Dharmarth Trust. Digitized By eGangotri

वि॰८
४
मोपसंहारैकरूप्यं च स्य चार्थस्य पुनःपुनरभ्यासो पा
स्मिन्नर्थे फलविशेषसंकीर्त्तनं प्रशस्तवार्थप्रमेयताव
पत्रार्थवादोपादानानुपपत्तिभिरुपपादनं चेत्यादीनि
लिंगानि भवंति तेन तस्य वाक्यस्य तास्मिन्नर्थे तात्पर्यमिति
गम्यते न च प्रमेयस्य [illegible] ध्यमेव तात्पर्यलिंगं तु [illegible] सेजाव
इत्यादिषु तात्पर्यदर्शनात् [illegible] स्य च प्रमेयत्वेन तात्पर्यसिद्धिः ता
त्पर्यसिद्धे साध्यस्य प्रमेयत्वेनेतीतरेतराश्रयात् साध्यैर्यप्रमिति
प्रतिबंधान्निरा[illegible] तात्पर्यमवगम्यते इति चेत् तथा
पि साध्यत्वानां तात्पर्यलिंगं जर्तिलयवाग्वा जुहुयादित्यादि
षु दर्शनात् तस्मादुक्तानि तात्पर्यलिंगानि वेदांतानां ब्रह्म
णि दृश्यते तथाहि सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं
ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि [illegible] त्वो
भ्यस्यते प्रमाणान्तराणां चानधिगतत्वमद्वितीयब्रह्मात्मत्वस्य

(c) Dharmarth Trust. Digitized By eGangotri

त्तिपाद्यते आचार्यवान्पुरुषो वेद तस्य तावदेव चिरं या
वन्न विमोक्ष्ये अथ संपत्स्य इति चानिर्दिशति शाय पुरुषार्थ्यैविद्याभिर्ब्रह्मज्ञान
फलमवगम्यते अनेन जीवेनात्मनानुप्रविश्य पेन
अनन्तं अनन्तमिन्नादि ब्रह्मराय र्थवाच्यो पादीयते नेमरुद्यो
तन्म परस्य गृहगतादिदृष्टान्तैः स्वापि किलासनिर्वचनेन वस्तुष्टि
ष्टियति सत्यं ब्रह्मज्ञानमेकत्वं प्रतिपाद्यते ... तथानैत्तरी
यके सत्यं ज्ञानमनन्तं ब्रह्म स यश्चायं पुरुषे यश्चासावादित्ये
स एक इत्युपक्रमोपसंहारयोः प्रत्यगभिन्नं ब्रह्मावगम्यते
तथा सच्च त्यच्चाभवत् यदिदं किंच तत्सत्यमाचक्षते स्वयमकुरु
त यत्सै वा वो निर्वचन इति च प्रत्यगभिन्नं ब्रह्माभ्यस्यते
प्रमाणां तेरणानच्छिय ब्रह्मणा विपश्चितेति पाद्यते सर्वान्कामान्
समश्नुत इति च फलं ब्रह्मज्ञानेनावगम्यते स एष इति तत्पश्चादि
पृ. २० नीय ब्रह्मप्रतिपत्त्यर्थं वाङ्मनसागोचरत्वं ... तथा कोशपंच

(c) Dharmarth Trust. Digitized By eGangotri

वि०८ कोपक्रमास्तेन प्रारणादिव्यापारलिंगैर्ब्रह्मात्मैकत्वं
५ प्रतिपाद्यत इति एवं सर्वेषु वेदांतेषु ब्रह्मैकत्वप्रमितौ
तात्पर्यलिंगानि द्रष्टव्यानि एतैस्तात्पर्यैराससमन्वया
द्ब्रह्मैव वेदांतप्रमेयमिति समन्वयाध्याय इत्यादिना सूत्र
भागं व्याचष्टे पदानामन्वय इति संबंधः न तु क्रियाकारक
संसर्गविषयतया पदानामन्वयं व्यावर्तयति परस्परान
नवच्छिन्नार्थानामिति ननु नीलादिशब्दस्य पदजातिसामा
नाधिकरण्येनादृग्यागमनूबाधितमिति दृग्यागशब्दयोर
नवच्छिन्नार्थत्वेपि नियोगाकांक्षाविरहेनान्वयो हापि स्या
दिति नित्याहानन्याकांक्षासाममिति एवं शब्दानां क्रिया
कारकेभ्यो वैलक्षण्यमुक्त्वा अर्थवैलक्षण्यं दर्शयति न तु क्रि
याकारकसंसर्गेभ्यो वैलक्षण्यमात्रं व्यतिरिक्तेति
ननु नीलोत्पलवदभेदविषयतया अभिधेया व्याप्ति

(c) Dharmarth Trust. Digitized By eGangotri

देकरसनिनेत्यत्राह एकरसोनित्यो ऽद्वितीयात्मशब्दवाच्योपनिषद्विषयो
यैकरसस्यार्थवर्तिनोरस्यार्थस्वातियोगाकांक्षावदिहा
नन्याकांक्षेति नेत्याह प्रातिपदिकार्थेति तत्रापि
लिंगसंख्याद्यो रवच्छ्याभ्युपगमतीयनेति नेत्याह मा
त्राकृत्यसयति जगत्कारणसामान्यानुवादेनतत्रज्ञाना
शराबा नंदविशेषनंदविशेषेणगमयन्तः एकतत्वानंदशब्दादेद
मिथ्याद्वैताभावाभिधानद्वारेणानन्तलादतत्त्वापावर्त्तंते ५
सर्वज्ञः सर्वशक्तिरित्यादिशब्दाश्चानिर्वचनीयप्रपंचो
पाधिनिष्ठावर्त्तंते अयमात्माब्रह्मतत्वमसीत्यादिशब्दाश्चस
र्वत्रशारात्म्यांब्रह्मत्यायेववर्त्तंते । सर्वजगत्कोरणा
विषयाःशब्दाश्चस्वलक्षणागोपाधिभिरेकरसायब्रह्म
प्रतिपादयंति नचानिर्वचनीयभेदाभावयोःशब्दप्र
५.८ त्तिनिमित्तयोःपरमार्थसत्यैकरसभेदनिमित्तमिति

(c) Dharmarth Trust. Digitized By eGangotri

वि॰ ८ अनेकेषां पदानां लक्षणादिद्वारेणैकरसत्वं तिनायामुदाहर
६ रणमाह । नन्वाद्विविधावाक्यप्रवृत्तिरेकाद्ब्रह्मात्मनोरेकत्वविष
यश्चपरासत्यज्ञानादिलक्षणस्य ब्रह्मविषयात्तत्त्वमस्यमंत्रस्या ।
त्मैकत्वेऽप्यत्र भाक्सोऽयमित्यादिवाक्यस्यपदानामिती ।
सोऽयं दे= नन्ववाक्यवदत्त इति पदत्रयस्यैकस्मिन्देवदत्ते पर्यवसान
दृश्यते नत्वादि प्रत्यभिज्ञायामधिगतमेकत्वं परस्मैप्र
तिपादयति सोऽयं देवदत्त इति तत्कालतद्देशकालयोरेकदेश त=
का तयोरैक्यं प्रत्यभिज्ञानानन्तरं प्रत्यक्षात् अतस्तत्वाविशि
ष्टयोरप्येकान प्रत्यभिज्ञायते किं तु सोऽयमिति विशिष्टपद
द्वयोपलक्षितः प्रत्यभिज्ञागोचरः प्रत्यभिज्ञानेवार्थ्यं परस्मै
सोऽयमिति विशिष्टाभिधायिभ्यां पदाभ्यां तत्त्वैकदेशाप
रित्यागेनैकदेशलक्षणया देवदत्तस्वरूपैक्यमेव प्रतिपाद
यति तत्सोऽयमिति पदार्थयोरपि देवदत्तैक्यपदवाक्येन ।

(c) Dharmarth Trust. Digitized By eGangotri

पिप्रतिपाद्यत्वेनानुवादप्रसंगः नचदेवदत्तस्यैकप्रत्यया
मात्रियेनवाक्यप्रमेयमपरमेकंस्यात् प्रत्यभिज्ञायांतर्हिकि
थंनैहायभिन्नयोरैक्यम् नदेवदत्तस्यैकाव्यतिरिक्तंप्रत्यभिज्ञाग
म्यमपरमेकमस्तीति किंत्वकालद्वयसंबंधः प्रत्यभिज्ञागोचर
इतिचेत्तत्कालद्वयसंबंधिपदार्थाभिन्नत्वमेववासिद्धंः पारिशे
ष्यादेवंप्रत्यभिज्ञाविषयः तत्रचानुवाददोषःस्यात्
ननु क्षणिकत्वपरिहाराय प्रत्यभिज्ञाप्रामाण्यमपेक्ष
णीयं तत्रकालद्वयपरामर्शेन तत्संबंधिपदार्थैक्यप्रत्यभि
ज्ञाविषयेपिपदार्थभेदभ्रांतिःस्यात् विरोधितेनप्रमाणांतरेणाना
ज्ञातार्थाधिगतिः तत्रकालद्वयपरामर्शेनतत्संबंधिप
दार्थैक्यमेवावलंब्यमानापदार्थभेदभ्रांतिरसाविरोधितया
२ प्रामाण्यमश्नुतेप्रत्यभिज्ञा एवंतर्हिसोयमितिवाक्यस्या
१०२ प्येवमेवप्रामाण्यंभविष्यति नैष्यात्तत्वमसिवाक्यस्यापि

(c) Dharmarth Trust. Digitized By eGangotri

वि॰ ८ स्वपदेनैकदेशपरित्यागेनलक्षणायाद्वस्तुस्वरूपस्यपरो
७ द्वपरित्यागेनतत्पदाभिधेयस्वरूपैकदेशबोधकैर्जन्या
ज्ञानगोचरैरपिजीवब्रह्मपदार्थप्रतीतिभिःसमयेप्रतिपन्नैक
विषयतयानुयोदध्यारोपावपिभेदप्रतिभासविरोधित्व
याध्यारोपयत्नमुपपद्यमानइति ननुपदार्थयोःप्रत्येकम
साधारणमेवैपदार्थप्रत्ययगोचरःपदार्थयोरितरेतरं
वाक्यैर्गम्यमित्यस्त्येवप्रमेयभेदः नैतत्सारं भिन्नद्रव्ययो
रेकप्रतिपादकतैवपात्स्यात् परे कौमेवद्रव्यमभिन्नोपाधि
परिकल्पितभेदप्रतिभासव्युदासेनप्रतिपादयन्तेतदा
भिवत्यविशेषादेवध्यारोपतत्प्रमेयविशेषात् मदुक्तं
सिद्धमनिवर्तकत्वादिति इत्थकार्यकारणद्रव्यव्यति
रिक्तत्वेसतिद्रव्याभिधायिपदयोःसामानाधिकरण्यं
सोयमितिनिवेदकद्रव्यस्योपाधिपरिकल्पितभेदव्युदासेन

(c) Dharmarth Trust. Digitized By eGangotri

२ कद्रूव्यपर्य्यवसायीत्यवगम्यते ननु तत्त्वंपदार्थयोर्लक्ष्य
मसत्यपदार्थयोरपि भेदो विद्यते न वा विद्यते चेद्वेदका माप
त्तिर्न स्यात् न चेद्भेदः वाक्यार्थ एव पदार्थः स्यात् सत्यं वा
क्यार्थ एव पदार्थः स च लक्षणया प्रतिपाद्यते तस्याभिधे
यैक्यायोगात् तस्मात्तत्त्वंपदाभ्यामेकमेव ब्रह्मोपाधिभेद
परामर्शेन प्रतिपाद्यत इति सिद्धं ननु केचिदाहुः लक्ष्यमा
णयोरपि जीवब्रह्मणोर्भेदाभेद्विविषयसामान्याधिकरण्यं
मन्यन्ते पदार्थवाक्यार्थयोः साकर्यात् अलीकं विज्ञानं
भेदोऽपि च आत्मेति निष्ठा नित्यादिलिंगात् ननु एकमे
वाभेदविषयेणवाक्येन अन्यज्ञानेन तदभ्यासजन्यापरोक्ष
ज्ञानेन वा भेदो निवर्त्यते न वेति निवर्त्यते चेत् कथं विज्ञान ४
९ स्यत्वाद्विषयाहि याप्तिर्वा स्तनीयज्ञाने भेदमात्रविषयेण
७.९ भेदो निवर्त्यते इति चेत्तन्न यथा प्रमाणानामभ्यासजन्यस्या

(c) Dharmarth Trust. Digitized By eGangotri

वि॰८
८

ज्ञानस्यभेदविषयत्वान्नचान्यथाप्रमाणेनैवयाप्या
सजात्यज्ञानेचभेदाभेदप्रमाणेचफलात ज्ञानविव
र्त्तिनभेदस्याविद्यावाल्मी पात्वमपिस्यात् ज्ञानेना
ज्ञानंनिवर्त्त्यतेनभेदस्तुकर्मभिर्विनश्यतीतिचेन्न ब्रह्म
वेदब्रह्मैवभवतीतिज्ञानप्रयुक्तत्वात्कारकाभिधे — ९:
पभेदनिरासस्य येनैवाकारेणजीवस्यभेदस्तेनैवचेद
भेदोपिभेदविच्छिन्नावभेदोपिविवर्त्तन आकारान्तरेण
चेद्भेदस्तदानिरवयवद्रव्यस्यैकदेशानक्रमेणाविव
र्तायितृत्वाकृतत्वशक्तिभिन्नाभिन्नस्वभक्ताविपिजीवः स्यात्
नचभेदाभेदौयथाश्रुत्याप्रतिपादनीयौलोकासिद्धसामा
न्यतोदर्शनेनैवसिद्धेः यदि च भेदाकारविशिष्टाजीव
स्तच्चाशिनतश्यैतत्त्वयभेदाविनिर्मुक्तोजीवः ब्रह्म
मेवजीवस्त्यैकाद्व्यानिष्ठसाधानाभावकरणायस्या

(c) Dharmarth Trust. Digitized By eGangotri

न्त अन्यविशिष्टोजीवोविशेष्यशानाश्रेपित्वत्रपाव
स्थानान्नुच्चवतइति नाहियोमुक्तिमनुभवतिसएवस
र्वमायिजीवः संसारीत्येकमेववस्तुसामानाधिकरण्यापा
लंबनायेत्युक्तं स्यात् तस्मादभिन्नाश्रयपरामर्शेनैक त्रिघ
स्मिन्वस्तुनिलक्षणयावृत्तिःसामानाधिकरण्यमिति
योपिलक्षणम राजीवप्रत्यक्षणरतीस्केनिमित्तंपद
र्थयोरनेकत्वंपकल्पयतिनस्याहि निषेकोभेदबुद्धिरा
करागीवः एकधैवानुद्धुपंततेनवासीविषयाणिः तस्मा
देकस्यद्रव्यस्योपाधिजनितभेदावभासपरामर्शेनैक
द्रव्यपर्यवसायिसामानाधिकरण्यमित्येकत्वंप्रत्युक्तमिति
सिद्धं इदानींसन्यवहारानार्यकस्योदाहरणमाह्य
१ दृष्टवांश्चाशाखायारिति नपातेकाप्यतिश्चन्द्रमसंदर्श
७.८ यति नव्याचव्याप्तिविशेषइति अयमर्थः एषशाखा

वि॰ ८ सामान्याभिधानमुखेन लक्षणया व्यक्ति विशेषे
९ वर्त्तते प्रकृष्टपाठकस्थलदारणाया प्रकार्षगुणाभिधान
मुखेन प्रकारा विशेषेवर्त्तते ननु गुणसामान्यवाचि
शब्दरूपपदार्थाभिधेयत्वाभावात् कथं लक्षणया तद्गुण
युक्तद्रव्यस्य प्रकारविशेष एवं तद्रूपपदाभिधे
यता समर्थनमिति गतकृष्टप्रकारविशेषतद्गुणा त्वका पीवृ
त्तितासिद्धा गुणगुणानां गुणेऽप्यन्वयः क्रियाकारकाद्यन्वा
वात् किं न स्यात् इत्यतआह किमतिकृतैत्मलवृद्धिरिति
एकमेवाद्वितीयं एकदेशायात्तु दृष्टत्वे न ज्ञानाशिति कि
चन उदरमन्तरं कुरुते अथ तस्य भयं भवति इत्यादि श्रुति श्रु
विधा वेदादित्यर्थः तत्त्वानुपदाहरत्यारभ्य -- पमनिरि ती
त्यन्तः प्राक्तनोग्रन्थः स्पष्टार्थः पत्युस्तिन सिद्धे वस्तुनिरू
प्यमुक्तापर्यमनुवदति परिणतिनिरूपायसंभवादिति

(c) Dharmarth Trust. Digitized By eGangotri

अयमाशयः किं प्रमाणांतरयोग्यत्वे सति तदनुत्पत्तौ विष
यस्याभावे निश्चिते तत्त्वशब्दस्य मिथ्यात्वमाशंक्यते किं
वा प्रमाणान्तरसंप्रतिपन्नार्थविषयत्वात्पौरुषेयवचोव
दनूद्यापेक्षप्रामाण्यमिति किं वा प्रमाणान्तरयोग्यार्थ
विषयत्वान्नास्तिसिद्धा पौरुषवादशंकेति न तावत्प्रथमः
कल्पः प्रमाणेन हि स्वकीयमाणास्यार्थस्य प्रमाणान्तरा
नुत्पादे मिथ्यात्वं नावहति सर्वप्रमाणानामप्यधिग
तार्थगन्तृत्वात् अन्यथा वेदस्याप्यप्रमाणस्य रूप
स्पर्शादिविषयकशरीरग्रहणस्यापि मिथ्यात्वाशंका स्यात्
कथंचित्तस्याप्येतत्प्रमाणस्य पुरुषवचसः प्रमाणान्त
राभावे मिथ्यात्वाशंका स्यात् न त्वपौरुषेयस्य वेद
६० वचसोऽनपेक्षत्वात् नापि द्वितीयः कल्पः प्रमाणान्त
प्र०८ रसंभिन्नार्थत्वाभावात् अन्यार्थविषयत्वेन वेदानां

(c) Dharmarth Trust. Digitized By eGangotri

ति

मि॰ ८ रैफलसत्तावाक्यवत्प्रमाणान्तरसंभिन्नार्थत्वेनोक्तिवेन

१० न पौरुषेयवचनप्रयुक्तत्वात्संभेदस्यानूद्यनार्थप्रयु

क्तत्वे मन्त्रवादादीनामपि संभेदः स्यादिति नन्वनूद्यनार्थ

त्वेनैव संभेदोऽस्तु इष्यत इति चेन्न हि स्वार्थप्रवृत्तानां

तरजन्यतासंभेदहेतुः कार्यपरतार्थेनापि हि लौकि

कवाक्यस्य तत्पादर्शनात् पुरुषो हि प्रमाणान्तरेणार्थ

मुपलभ्य तन्निमित्तं परस्मै शब्दं विरचयति न तु वेदस्य सः

प्रमाणान्तरजन्यतेत्यनपेक्षता किं च कचयेवत्यावृत्ति मन्त्र

व्यवहार= प्रमाणान्तरसंनिधियोग्यमिति विधिवाक्यानामपि सं

भिन्नार्थतया सापेक्षता स्याद् लौकिकविधीनां प्रमा

णान्तरयोग्यतादर्शनात् अयोग्यत्वे वा तत्संबन्धा

प्रत्यासत्तेरप्यर्थप्रतिपत्तिर्न स्यात् तदुक्तं कार्यस्य प्रत्य

क्षत्वाभावात् न प्रमाणान्तरगम्यत्वेनेति ब्रह्मावि

(c) Dharmarth Trust. Digitized By eGangotri

गतिरूपादिति तत्त्वात्तत्प्रमाणान्तरेणागम्यते स्वरू
पज्ञानमेव प्रमाणानां तत्स्वरूपं तत्स्वसंभिन्नतयासाधे
त्तत्तेति चेत्तत्र शब्दजन्यज्ञानविषयस्यैव तत्तत्तयाप्रमा
णफलरूपत्वात् चैतन्यज्ञानसंभिन्नत्वेवाध्यक्षाणि
शब्दस्यानपेक्षप्रामाण्यसिद्धिः पुरुषान्तरज्ञानस्य च
विषयं च पुरुषान्तरानुमानं स्वयंप्रकाशविषयमपि
संभिन्नार्थतयानपेक्षामिति तस्मादनपेक्षमपौरु
षेयं वचः नापि तत्त्वोपकल्पः स्पर्शज्ञानयोग्यद्रव्यवि
षयस्य चक्षुषोऽनुवादकत्वादर्शनात् शब्दविषयेऽपि
नियम इति चेत् विधिवाक्यस्यापि स्यात् तस्यापि लौकि
६६ कस्य मानान्तरयोग्यत्वात् शब्दावगतस्य वा प्रमाण
तत्समनुवादः किं न स्यात् तस्माज्ज्ञातार्थ्यनियमापि वै
१० दिकं वचोऽनपेक्षप्रमाणमिति तत्र चोदयन्ति नानि

(c) Dharmarth Trust. Digitized By eGangotri

बि॰ ८ द्विपाणो वक्तृत्वादिति स्वयमेवाह॥ किं प्रमाणान्तरगृ
११ हीतेर्थे संबंधग्रहणमात्रमुच्यते किं वा प्रमाणान्त
रमपि शब्दार्थ इति पूर्वस्त्वगीतनत्वात् यद्यपि शा
ब्दमात्रस्येति नापि द्वितीयः कल्प इत्याह व्युत्पत्तावु
क्ष्यमिति ननु प्रमाणान्तरगृहीतेर्थे प्रयोगे स्वत
पदर्शनात्तत्संभिन्नार्थज्ञाने शब्दसामर्थ्यमवगत
मित्याह॥ श्रोतृव्यवहारो हि मूलमिति प्रथमः पक्षः
शब्दादर्थं प्रतिपद्यमानः श्रोता स्वकीयप्रमाणास
भिन्नमर्थं प्रतिपद्यते किं वा व्युत्पन्नः प्रमाणसंभि
न्नमात्रे सविकल्पः प्रमाणसंभिन्नामपि नितान्तवत्
वैफल्यात् शब्दार्थप्रतिपत्तेः आद्य उभयोरपि तावत्सिद्धेर्थे
प्रमाणानुत्पादात् प्रमाणान्तरेणोपलभ्यमानत्वा
द्धप्रयोगाद्धेतुः प्रमाणसंभिन्नेर्थे श्रोतुः शाब्दप्रमिति

(c) Dharmarth Trust. Digitized By eGangotri

ना

सिद्धिरुक्ता तथैव शब्दस्य सामर्थ्यं — श्रोतुः प्रवृत्त्या प्रति
पद्यत इति येन तथा हि स एव श्रोतुः ज्ञानान्तराणि विना परि
स्फुरति निश्चयमाशयः कुतश्चनापि प्रत्यक्षादिभ्यो वक्तु
रेव वाक्तितव्यार्थज्ञानमात्रान्न प्रवर्तमानमात्मानम प
श्यति न प्रमाणान्तरसंभिन्नार्थज्ञानान्न तत्रस्थस्यैव
च दृष्टं तेन श्रोतृप्रवृत्तिलिंगात्स्वार्थमाप्तज्ञानमनुमिमीते
न वक्तुः प्रमाणान्तरस्याविषयविशेषणान्नावगम्यत्वेन तत्प्र
वृत्तिलिंगतां कल्पयति दृष्टान्ताभावात् अतः प्रमाणान्त
रस्याविषयविशेषणत्वेनावगम्यमानतया प्रवृत्तेः प्र
त्यनिमित्ततयापरिस्फुरतः श्रोतृव्यवहारः केवलार्थ
६४ ज्ञानाज्जन्य इत्यर्थः ननु शब्दस्यार्थमात्रज्ञाने साम
र्थ्यप्रतिपत्तौ न प्रमाणान्तरसंधिः शब्दार्थ इत्याह
पृ.२८ नैव प्रतिपन्नानां नरत्रियाप्यर्थावबोधकत्वमिति

(c) Dharmarth Trust. Digitized By eGangotri

वि॰८
१२

ननुमान्तरपदैः प्रमाणान्तरसंभिन्नोऽर्थः प्रतिपन्नः
तथापि वृत्त्यन्तरासंभिन्ने ऽर्थे शाब्दसामर्थ्यं प्रतिपद्य
त इति नेत्याह तेनानवगम्यैव — तद्विषयामिति प्रवृ
त्तिहेतुज्ञानविषयतया त्वानुमानेनानवगतस्य समा
नान्तरस्य तथा ह — सामर्थ्यविषयतया प्रतिपत्तुः शक
नैरस्यार्थः नन्वर्थमात्रे संबंधग्रहणेऽपि वृत्त्यन्त
रकालसंभिन्नोऽर्थो बोध्यत इति नेत्याह पर्यावगम
यैति ननु कार्यविषयाकाकादसंभिन्नेऽर्थे युक्तः संबंधग्र
हः कार्यपदव्युत्पत्तिस्तु किस्य नु शब्दमात्रस्य संभिन्नेऽर्थे सं
बंधग्रह इति नेत्याह तेषामपि कार्यवाक्येऽर्थमात्रे संबंधग्र
हणात् ... केचि — दाहुरर्थासंस्पर्शी शब्द इति तन्न्या
स्येन्गुलाग्रे हस्तिशतमास्ते इत्यादौ ... कश्चिदर्थः
प्रमीयते ... प्रमीयते तत्रापि मानान्तरानिवंध

(c) Dharmarth Trust. Digitized By eGangotri

नाप्रमितिर्व्दिशब्दनिबंधनेति ककको चित्परिहारमा
चष्टे नेपक्ष एव च शाब्देनार्थसंसर्गः प्रमेयः किंत्वेवमेव
वेदेपि वक्तृज्ञानमेव प्रमीयते प्रमीयमाणं वक्तृज्ञा
नं सामर्थ्यात्तावार्थमिति बोध्यते सर्वत्र चांगुल्यादि
वाक्येषु भ्रांतिरुत्केदाप्रमाणं वा वक्तृज्ञानं शब्दस्मे
यं न व्याभिचरति तस्मादर्थसंसर्गोपि वक्तृज्ञ तद
नं वक्तृज्ञानस्यानुमानगम्यत्वात् प्रावृत् प्रमेयत्वाभावा
दित्याह पदादपुनर्व्युत्पन्नः सान्निध्यमर्थः गदजीत
संबंधोपि सन् प्रमाणान्तरेणाप्यनुपलभ्य विवादितत्वापर
स्मैशब्दं प्रयुंजानमात्मानं पश्यति तेन दृष्टान्तेन दूर्व
मपि मध्यम वृद्धेभ्यः प्रयोजकाः प्रयुंजानाः प्रमाणा
न्तरेणानुपलभ्य विवादितत्वा प्रयुंजते इति मध्यमवृद्धिम्यात्
न्न्येवमपि शब्दस्तामध्यविवियत एवं प्रमाणान्तरस्य

(c) Dharmarth Trust. Digitized By eGangotri

ॐ

नामैः

वि० ८ ऽभिमीनस्तिनेत्याह केवलमिति शब्दप्रयोगनि

१२ मित्त — नामै वविवक्षामात्रं तत्र वोः स्वात्मनि पसयत्व

त्पत्त्रापित्ति येवाङ्गिमीन शब्दैः प्रकरणार्थमनु

योपसंहरति तस्मान्न शब्दस्येत्यारभ्याथिकेत्यतः प्राक्कवे

नग्रंथेन किंच यदि लौकिककवाक्यासिवक्तृज्ञानमवग

यन्ति तदा संसृष्टार्थप्रमिप्सादनसामर्थ्यप्रतिपत्तेर्वे

दे शब्दार्थाधिगमो न स्यात् किंच नतावद्वक्तृज्ञानमा

त्रं शब्दार्थोऽर्थव्यवहारादृश्यप्रसंगात् तात्पर्यव्या

दृत्तं ज्ञानं अर्थस्येव शब्दप्रमेयत्वप्रसंगात् ज्ञानस्या

नुमेयतयान्यथासिद्धेः नानाभिधायि शब्दाभावाच्च

न तत्स्यवाक्यार्थता पदार्थस्येव वाक्यार्थत्वात् न

पदेभ्यः पदार्थाः प्रतीयन्ते संसर्गस्तु प्रत्ययेन तयावग

म्यते ते यथा व्यक्तवक्तृज्ञानं शब्दार्थ इति नादिदं

(c) Dharmarth Trust. Digitized By eGangotri

तः संसर्गज्ञानं वक्तृज्ञानविशेषणार्थविषयतया
प्रथमोत्पन्नं स्मृतिसंशयाविपर्यासायोगात् प्रमा
णज्ञानमेव परिशिष्यते शब्दानां च पदार्थज्ञानोप
जीव्यात् वक्तृज्ञानाधीनैव संसर्गप्रमितिरिति वेद सं
सर्गाशब्दार्थो न स्यात् तस्माच्छब्दात्संसर्गप्रमितिर्व
क्तृज्ञानानुमेयामिति सिद्धं कथं तर्हि शब्दानामर्था
संस्पर्शस्य परिहारः इति उच्यते अत्यन्तोपि तुल्यमतद्बोधे शु
क्तिरजतादिज्ञानानामर्थव्यभिचारात् अदुष्टकरणज्ञानानामर्थ जन्य
संस्पर्शित्वेन शब्दोपि योग्येतरसंसृष्टाभिधायित्वार्थनियमो
विद्यते अंगुल्यग्रादीनां संसर्गायोग्यत्वादिति किंचादुष्टत्वेपि यो
शब्दस्यानपेक्षप्रमाणत्वात्मानांतरसंवादविसंवादाभ्यां नाकां
क्षितपरिहीयतत्स्वत्याहापि चापौरुषेय इति न वक्तृमितिस्पर्शोर्थः
न तस्माच्छब्दाभितिपरिहारग्रंथस्यायमर्थः निरपेक्षज्ञानयोरपि

(c) Dharmarth Trust. Digitized By eGangotri

वि०८
२७

परस्परविरुद्धयोरन्यतरस्यकारणदोषसंभावनयावाधोति
कल्प्यते तत्राद्वितीयप्रत्यगात्मप्रतिपत्तेरात्मातिद्वैतप्रत्ययस्य
चाविरोधे द्वैतावभासस्य देहात्मप्रत्ययवत् दुष्टकरणजन्यत्वंक
ल्प्यते शब्दस्य स्वयं दोषराहित्यात् द्वैतावभासहेतूनां चक्षुरा
दीनां संभावितदोषत्वात् इन्द्रोमायाभिर्मायांतुप्रकृतिमविद्या
यामंतरश्रुत्यादिदोषजन्यत्वं श्रवणादेस्तुपूर्ववद्दोषजन्यत्वेपि
व्यवहाराविसंवादिप्रामाण्यलाभात् शब्देनपुनर्द्वैतविकल्प
नायां व्यवहारातीतविषयत्वात् दोषवत्त्वापादकत्वात् श्रुतेरु
भयविधमपि प्रामाण्यं न स्यात् नच द्वैतावभासस्य दोषजन्यत्वा
त्स्वप्नरजतज्ञानवद्व्यवहाराविसंवादः कल्पयितुं शक्यः प्रत्य
दाविरोधात् आगमेनत्वेकत्वस्य तत्त्वावेदकत्वाबाधात्तव्यवहारावा
धाभावाद् अद्वितीयात्मप्रतिपत्तेश्च शब्दादीनामर्थक्रियासा
मर्थ्यफलित्वात् तस्माद् द्वितीयात्मप्रतिपत्तिरपरोक्षात्

(c) Dharmarth Trust. Digitized By eGangotri

पादेहात्मप्रत्ययमिवं चैतावभासं वाधते अन्यथा देहात्मा
भावस्याप्यबाधप्रसंगादिति ननु प्रमेयगतादोषादेव विज्ञानस्यो
भ्रान्त्यादिज्ञानवत्प्रत्यक्षज्ञानमपि मिथ्येति तेनाह प्रमेयस्य पुन
र्न्हानहेतुत्व इत्यादिना अत इत्युपसंहरति कापि बम्भूतार्थ
निष्ठत्वात्प्रमाणानां न परविरोधः उच्यते संवादोवापेद्यत इति वि
रोधेन्यतरस्य बाधो दर्शितः संवादोपि दर्शित इति चेत् तेनाह
न संवादलक्षणमिति अनधिगतार्थावगम एव प्रमाणलक्षण
मित्यर्थः ननु किमायातमिति तदाह तत्रोपत्यैव विधिवाक्या
नामिति ननु स्तुतिवचनविरोध इति चोदयति ननु विधिवाक्या
नामेवेति नेतरेतराश्रयत्वादिति परिहारः ननु स्तुतिकारप्र
माणायां देवाम्नायस्य क्रियार्थत्वं सिद्धमिति तेनाह नहि
पप कमन्यत इति कस्तर्ह्याम्नायार्थ इति तदाह ततो पदवगमयतीति
ननु प्रमेयाविशेषादेव प्रामाण्यं तावदेवाधातु न कार्यस्याप

(c) Dharmarth Trust. Digitized By eGangotri

वि॰८ ववोधयतिबंधनत्वादित्याह तस्माद्यथाकार्यमिति ननहि
२५ प्रमाणेभ्य शब्देभ्यः प्रतीतिरिति नेत्याह प्रतीतिश्चेति ननु प्रवर्त्त
नालक्षणांप्रामाण्यबोधलक्षणामितिनेत्याह प्रत्यक्षा
दिष्वपीति नन्वभिन्नमेवप्रमाणलक्षणं प्रत्यक्षादिष्ववस्तुमा
त्रावबोधः प्रमाणलक्षणं प्रवृत्तिनिवृत्तीतुवस्तुस्वभावानु
रोधित्वेनप्रमाणफलं शाब्दे तु पुनः प्रवृत्तिनिवृत्तिफलप
र्यन्त एवप्रमाणव्यापारः श्रोतुः पुरुषार्थमुद्दिश्यशब्द
प्रयोगात् अतः प्रवृत्तिनिवृत्तिशून्येऽस्तु नैवस्तुनिमिशब्दप्रा
माण्यमित्याह हाह उक्तमित्यादिनाऽज्यन्तेइत्यतःप्राक्तो वे
नाऽज्यत इत्यादिः परिहारः इदंनिरूपणीयं अत्रपुरुषानि
ष्टप्राप्तिपरिहारमात्रप्राप्यं लौकिकवाक्ययोः प्रवृत्तिनिवृत्तिसाध्य
त्वमपीति नेत्रप्रवृत्तिनिवृत्तिसाध्येष्टानिष्टप्राप्तिपरिहारप्रा
प्यतावकल्पनात्तलयापश्यीहितनाहितमाप्तिपरिहारप्राप्यतेवस्तु

(c) Dharmarth Trust. Digitized By eGangotri

नेत्याह उक्तयोरत्यन्ताद — पेक्षाइति ननु सर्वस्य साध्यस्वभावमेव पुरु
षार्थं प्रार्थ्यत इति नेत्याह नात्विस्त्यमत्वय्यावेति फलमेव हि
स्वयं प्रार्थ्यते फलत्वान्तरीयिकां साधनं प्रार्थनेत्यर्थः ननु साध्या
साध्यावपि पुरुषार्थौ साध्यावेव करोतीति नेत्याह न चास्य स्व
पमीप्सुरिति ननु सर्वं साध्यं पदं पुरुषार्थः ननु सिद्धस्वभाव स्वरू
पत्यागोत्पत्त्यभावादिति तत्राह द्विविधं चेष्टमिति ननु द्विविधोपि
पुरुषार्थे साध्यस्वभाव नान्यथा केन इति नेति विभज्य दर्शय
ति तत्र प्राप्य परिहार्ययोरिति ननु ज्ञानमात्रसाध्यः पुरुषार्थो न
लभ्यत इति तत्राह इतरयोस्तु — भ्रान्तिमात्रव्यवहितत्वादिति
ननु हस्तगतविस्मृतसुवर्णस्य तत्वतः कान्स्याभिसमारोपितस
र्पादिभावस्य तत्वज्ञानान्निवृत्तिविपुरुषार्थतया नानुमत्वा गेऽ
क्रियासाध्यस्यैव पुरुषार्थता प्रसिद्धेरिति नेत्याह एवमपि ल
५८ भ्यमानामिति साधनसाध्यत्वे ज्ञानसाध्यस्यातिशयेन पुरु
पृ.२

(c) Dharmarth Trust. Digitized By eGangotri

वि०८ पार्थत्वामात् ऽतत्रांचामिनंदनीनिजनऽमूलात्मेकान्वेप्राप्ति
२६ पा धमानेनक्रियासा ॥ः भक्त पार्थः नापेक्षानलभ्य इति ॥ न
त्र ऽनेकान्तर्थ्यकल्पितनामिवेति किंच शब्दस्य प्रामाण्यप्रा
त्यदादिवत् प्रमेयमात्रावबोधनिवंधजं किं न स्यात् नच प्र
वृत्तिनिवृत्ती साध्ये तत् फलमवगते वस्तुनि प्रयोजनाभावेनुपल
ब्धिनिबंधनत्वात् प्रवृत्तिनिवृत्त्योः नचानेन भक्त पार्थत्व यार
को दितिलेश कंटुः स्व प्राप्ति परिहार लक्षणान्तवान्तप्रयोजनस्य
तत्रस्थानित्यनैमित्तिकवाक्यानां प्रयोजनमुक्त्वा तया प्रामा
ण्यं न स्यात् प्रकरणाप्रत्यवायपरिहारः फलमिति चेन्न प्र
त्यवायस्यापि तन्निबंधनत्वात् नित्यनैमित्तिकविधयोरशु त्र
नाननुष्ठानयोः स्तत्वमिव शापयन्तीति न तद्वाक्यानां प्रामाण्यं
युक्तं अतो बोधकत्वात् एव प्रामाण्यं न प्रवृत्तिलक्षणानामि
ति तस्मात् सिद्धं प्रमाणं वेदप्रामाण्यमित्युपसंहरन्ति तस्मा

(c) Dharmarth Trust. Digitized By eGangotri

न्सिद्धंप्रत्यक्षा: शास्त्रप्रमाणकत्वमिति इति श्रीसमन्वय
सूत्रे प्रथमवर्गकं समाप्तम् शुभम्भूयात्सर्वजगताम्
संवत १९८३ चैत्रवदित्रयोदश्यां प्र० २८

(c) Dharmarth Trust. Digitized By eGangotri

इतिपंचपादिकाविवरणस्यसमन्वयसूत्रस्यव्याख्यानवर्णकं

नं. १८७४

(c) Dharmarth Trust. Digitized By eGangotri